योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३९

एकोनचत्वारिंशः सर्गः ३९

श्रीवसिष्ठ उवाच ।

इति संचिन्त्य सर्वात्मा क्षीरोदादात्मकात्पुरात् ।

चचाल परिवारेण सह सानुरिवाचलः ।। १

क्षीरोदतलरन्ध्रेण तेनैव स्तम्भिताम्भसा ।

प्रह्लादनगरं प्राप शक्रलोकमिवापरम् ।। २

हेममन्दिरकोशस्थं ददर्शात्रासुरं हरिः ।

अथ शैलगुहालीनं समाधिस्थमिवाब्जजम् ।। ३

तत्र ते तेजसा दैत्या वैष्णवेनावधूलिता ।

दूरं ययुर्दिनेशांशुवित्रस्ता इव कौशिकाः ।। ४

द्वित्रैः सहासुरैर्मुख्यैः परिवारयुतो हरिः ।

प्रविवेशासुरगृहं तारावानिव खं शशी ।। ५

वैनतेयासनस्थोऽसौ लक्ष्मीविधुतचामरः ।

स्वायुधादिपरीवारो देवर्षिमुनिवन्दितः ।। ६

महात्मन्संप्रबुध्यस्वेत्येवं विष्णुरुदाहरन् ।

पाञ्चजन्यं प्रदध्मौ च ध्वनयन्ककुभां गणम् ।। ७

महता तेन शब्देन वैष्णवप्राणजन्मना ।

तुल्यकालपरिक्षुब्धकल्पाभ्रार्णवरंहसा ।। ८

आसुरी जनता भूमौ पपातागतसंभ्रमा ।

मत्तलीलाभ्रनादेन राजहंसावली यथा ।। ९

जहर्ष जनितानन्दा वैष्णवी गतसंभ्रमा ।

जनता जलदध्वानफुल्लेव कुटजावली ।। १०

बभूव संप्रबुद्धात्मा दानवेशः शनैःशनैः ।

मेघावसर उत्फुल्लकदम्ब इव कानने ।। ११

ब्रह्मरन्ध्रकृतोत्थाना प्राणशक्तिरथासुरम् ।

शनैराक्रमयामास गङ्गा सर्वमिवार्णवम् ।। १२

क्षणादाक्रमयामास प्राणश्रीः सर्वतोऽसुरम् ।

उदयानन्तरं सौरी प्रभेव भुवनान्तरम् ।। १३

प्राणेषु रन्ध्रनवके प्रवृत्तेष्वथ तस्य चित् ।

चेत्योन्मुखी बभूवान्तः प्राणदर्पणबिम्बिता ।। १४

चेतनीयोन्मुखी चेत्यं चिन्मनस्तामुपाययौ ।

द्वित्वं मुकुरसंक्रान्ता मुखश्रीरिव राघव ।। १५

किंचिदङ्कुरिते चित्ते नेत्रे विकसनोन्मुखे ।

शनैर्बभूवतुस्तस्य प्रातर्नीले यथोत्पले ।। १६

प्राणापानपरामृष्टानाडीविवरसंविदः ।

वातार्तस्येव पद्मस्य स्पन्दोऽस्य समजायत ।। १७

निमेषान्तरमात्रेण मनः पीवरतां ययौ ।

तस्मिन्प्राणवशात्पूर्णे तरङ्ग इव वारिणि ।। १८

अथासौ विकसन्नेत्रमनःप्राणवपुर्बभौ ।

अर्धोदित इवादित्ये सरः स्फुरितपङ्कजम् ।। १९

अस्मिन्नवसरे यावद्बुध्यस्वेत्यवदद्विभुः ।

प्रबुद्धस्तावदेषोऽभूद्बर्ही घनरवादिव ।। २०

प्रफुल्लनयनं जातमननं पीवरस्मृतिम् ।

उवाचैनं त्रिलोकेशः पुरा नाभ्यब्जजं यथा ।। २१

साधो स्मर महालक्ष्मीमात्मीयां स्मर चाकृतिम् ।

अकाण्ड एव किं देहविरामः क्रियते त्वया ।। २२

हेयोपादेयसंकल्पविहीनस्य शरीरगैः ।

भावाभावैस्तवार्थः किमुत्तिष्ठोत्तिष्ठ संप्रति ।। २३

स्थातव्यमिह देहेन कल्पं यावदनेन ते ।

वयं हि नियतिं विद्मो यथाभूतामनिन्दिताम् ।। २४

जीवन्मुक्तेन भवता राज्य एवेह तिष्ठता ।

क्षेपणीया गतोद्वेगमाकल्पान्तमियं तनुः ।। २५

तन्वां कल्पान्तशीर्णायां स्वे महिम्नि त्वयानघ ।

वस्तव्यं स्फुटिते कुम्भे कुम्भाकाशेन खे यथा ।। २६

कल्पान्तस्थायिनी शुद्धा दृष्टलोकपरावरा ।

इयं तव तनुर्जाता जीवन्मुक्तविलासिनी ।। २७

नोदिता द्वादशादित्या न प्रलीनाः शिलोच्चयाः ।

न जगज्ज्वलितं साधो तनुं त्यजसि किं मुधा ।। २८

वायुर्वहति नोन्मत्तस्त्रिलोकीभस्मधूसरः ।

लोलामरकपालाङ्कस्तनुं त्यजसि किं मुधा ।। २९

अशोक इव मञ्जर्यः पुष्करावर्तविद्युतः ।

न स्फुरन्ति जगत्कोशे तनुं त्यजसि किं मुधा ।। ३०

धरासाररणच्छैलाः प्रज्वलज्ज्वलनोज्ज्वलाः।

ककुभो न विशीर्यन्ते तनुं त्यजसि किं मुधा ।। ३१

न ब्रह्मविष्णुरुद्राख्यत्रयीशेषमिदं स्थितम् ।

जगज्जरठजीमूतं तनुं त्यजसि किं मुधा ।। ३२

न चेहाद्रिदलश्रेणिमात्रैकानुमितान्तराः ।

दिशो जर्जरतां यातास्तनुं त्यजसि किं मुधा ।। ३३

स्फुटदद्रीन्द्रटंकाराः कराः सौरा भ्रमन्ति खे ।

कल्पाभ्राणि न गर्जन्ति तनुं त्यजसि किं मुधा ।। ३४

अहं भूतावकीर्णासु सालोकासु खगध्वजः ।

विहरामि दशाशासु मा देहमवधीरय ।। ३५

इमे वयमिमे शैला भूतानीमान्ययं भवान् ।

इदं जगदिदं व्योम मा देहमवधीरय ।। ३६

पीवराज्ञानयोगेन यस्य पर्याकुलं मनः ।

दुःखानि विनिकृन्तन्ति मरण तस्य राजते ।। ३७

कृशोऽतिदुःखी मूढोऽहमेताश्चान्याश्च भावनाः ।

मतिं यस्यावलुम्पन्ति मरणं तस्य राजते ।। ३८

आशापाशनिबद्धोऽन्तरितश्चेतश्च नीयते ।

यो विलोलमनोवृत्त्या मरणं तस्य राजते ।। ३९

यस्य तृष्णाः प्रभञ्जन्ति हृदयं हृतभावनाः ।

प्ररोहमिव गर्ध्रेभ्यो मरणं तस्य राजते ।। ४०

चित्तवृत्तिलता यस्य तालोत्तालमनोवने ।

फलिता सुखदुःखाभ्यां मरणं तस्य राजते ।। ४१

रोमराजीलताजालं यस्येमं देहदुर्द्रुमम् ।

अनर्थौघो हरत्युच्चैर्मरणं तस्य राजते ।। ४२

यस्य स्वदेहविपिनमाधिव्याधिदवाग्नयः ।

दहन्ति लोलाङ्गलतं मरणं तस्य राजते ।। ४३

कामकोपात्मका यस्य स्फूर्जन्त्यजगरास्तनौ ।

अन्तःशुष्कद्रुमस्येव मरण तस्य राजते ।। ४४

योऽयं देहपरित्यागस्तल्लोके मरणं स्मृतम् ।

न सता नासता तेन कारणं वेद्यवेदनम् ।। ४५

यस्य नोत्क्रामति मतिः स्वात्मतत्त्वावलोकनात् ।

यथार्थदर्शिनो ज्ञस्य जीवितं तस्य शोभते ।। ५

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।

यः समः सर्वभावेषु जीवितं तस्य राजते ।। ४७

योऽन्तःशीतलया बुद्ध्या रागद्वेषविमुक्तया ।

साक्षिवत्पश्यतीदं हि जीवितं तस्य राजते ।। ४८

येन सम्यक्परिज्ञाय हेयोपादेयमुज्झता ।

चित्तस्यान्तेऽर्पितं चित्तं जीवितं तस्य शोभते ।। ४९

अवस्तुसदृशे वस्तुन्यसक्तं कलनामले ।

येन लीनं कृतं चेतो जीवितं तस्य शोभते ।। ५०

सत्यां दृष्टिमवष्टभ्य लीलयेयं जगत्क्रिया ।

क्रियतेऽवासनं येन जीवितं तस्य राजते ।। ५१

नान्तस्तुष्यति नोद्वेगमेति यो विहरन्नपि ।

हेयोपादेयसंप्राप्तौ जीवितं तस्य शोभते ।। ५२

शुद्धपक्षस्य शुद्धस्य हंसौघः सरसो यथा ।

यस्माद्गुणौघो निर्याति जीवितं तस्य शोभते ।। ५३

यस्मिन्श्रुतिपथं प्राप्ते दृष्टे स्मृतिमुपागते ।

आनन्दं यान्ति भूतानि जीवितं तस्य शोभते ।। ५४

यस्योदयेषु हृदयेन जनाम्बुजानि

जीवालिमन्ति सकलानि विलासवन्ति ।

तस्यैव भाति परिजीवितमक्षयेन्दो-

रापूर्णतेव दनुजेश्वर नेतरस्य ।। ५५

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मोक्षो० उपशमप्रकरणे प्रह्लादनिर्वाणे नारायणवचनोपन्यासो

नामेकोनचत्वारिंशः सर्गः ।।३९।।